आरोपितमिति तस्याध्यासिकत्वमिति वेदान्तिसिद्धान्तः ।

**आध्र** पु० आ+धृ—क । आधारे । “आध्रस्य चित् प्रमतिरुच्यसे” ऋ० १,३१,१४ । “आध्रेण चित्तद्वेकं चकार” ऋ०७,१८,१७ ।

**आध्वनिक** त्रि० अध्वनि कुशलः ठक् । पथिकुशले “कान्तारेष्वपि विश्रामे जनस्याध्वनिकस्य वै” भा० आ० ।

**आध्वरायण** पुंस्त्री० अध्वरोयज्ञाभिज्ञस्तस्य गोत्रापत्यम् नडा० फक् । यज्ञविद्गोत्रापत्ये ।

**आध्वरिक** पु० अध्वरस्य व्याख्यानो ग्रन्थः ठक् । अध्वरव्याख्याने १ग्रन्थे । अध्वरं यज्ञं वेत्ति तत्प्रतिपादकग्रन्थमधीते वा ठक् । २यज्ञवेत्तरि ३तत्प्रतिपादकग्रन्थाध्येतरि च त्रि० ।

**आध्वर्य्यव** त्रि० अध्वर्य्योर्यजुर्वेदविद इदम् अञ् । अध्वर्य्यु सम्बन्धिनि कर्म्मादौ । “यदि वाध्वर्य्यवं राजा नियुनक्ति पुरोहितम्” अथ०१०,५,२,२ । “ऋग्वेदेन हौत्रमकुर्व्वत यजुर्वेदेनाध्वर्य्यवं सामवेदेनोद्गीथम्” शत०ब्रा० ।

**आन** पु० आनित्यनेन आ+अन—करणे क्विप् आ प्राणवायुः ततः सुवास्त्वा०अदूरभवादौ अण् । सम्यग्जीवनसाधनस्य अन्तःस्थितस्य प्राणवायोर्नासिकया वहिर्निस्सारणे उच्छ्वासे

**आनक** पु० आनयति सोत्साहान् करोति अन—णिच् ण्वुल् । १पटहे, २मृदङ्गे, “ततः शङ्खाश्च भेर्य्यश्च पणवानकगोमुखाः सहसैवाभ्यहन्यन्त” गीता ३सशब्दमेघे च । ४उत्साहके त्रि० । कर्ण्णादि० चतुरर्थ्यां फिञ् । आनकायनिः । तत्सन्निकृष्टदेशादौ त्रि० ।

**आनकदुन्दुभि** पु० आनकः प्रोत्साहकोदुन्दुभिर्देववाद्यविशेषो यस्य । १कृष्णपितरि वसुदेवे । कृष्णजन्मोत्सवे हि तथा वाद्यं तद्गृहे जातमिति तस्य तथात्वम् । २वृहड्ढक्कायां स्त्री वा ङीप् ।

**आनकस्थली** स्त्री आनकप्रधाना स्थली शा०त० । आनकप्रधानस्थल्यां देशभेदे तस्यां भवः अदूरदेशादौ धूमा० वुञ् । आनकस्थलकः तत्सन्निकृष्टदेशादौ त्रि० ।

**आनडुह** न० आनडुह इदम् अण् । १वृषसम्बन्धिनि गोमय चर्म्मादौ । “आनडुहोगोमयः क्षुरः स्थालीपाकः” गोभि० “चर्म्मण्यानडुहे रक्ते स्थाप्यं भद्रासने तथा” या०स्मृ० । अनडुहा कृतम् अण् । २स्वनामख्याते तीर्थभेदे तच्च तीर्थं सह्यगिरिसन्निकृष्टदेशस्थितम् यथा क्रौञ्चपुरं वसयित्वा । “तमद्यैव राजानं निवासाय गतेऽहनि । तीर्थमानडुहं नाम गमिष्यामः सनातनम् । ततश्च तं गमिष्यामः सह्यस्य विवरे गिरिम्” । गोमन्तमिति विख्यातम्” हरिवं०९६अ० ।

**आनडुहक** त्रि० अनडुहा कृतम् संज्ञायां कुलला० वुञ् । अनडुत्कृते गोमयादौ ।

**आनडुह्य** पु० अनडुहोगोत्रापत्यम् गर्गा० यञ् । अनडुन्नामकस्य मुनेर्गोत्रापत्ये । ततः पुनः गोत्रापत्ये अश्वा० फञ् । आनडुह्यायनः तदपत्ये पुंस्त्री० । चतुरर्थ्यां कर्ण्णा० फिञ् । आनडुह्यायनिः तत्सन्निकृष्ट देशादौ त्रि० ।

**आनत** त्रि० आ+नम—क्त । १कृतप्रणामे, २अधोमुखे, ३विनयेन नते च “तं व्याससूनुमसत्यं मुनिमानतोऽस्मि” भा० १मस्कन्धे । “स्पृशन् करेणानतपूर्व्वकायम्” रघुः ।

**आनति** स्त्री आनमति प्रवणीभवत्यनया आ+नम—करणे-क्तिन् । आनुगत्यजन्ये १सन्तोषे “यच्च चिरावस्थितेर्व्यभिचारात् न प्रतिग्रहकारणत्वमानतेरिति” “आनतिद्वारा न प्रतिग्रहार्थत्वं द्रव्यस्येत्युक्तं तन्मन्दतरम् आनतिद्वारेण चिराश्रयणादीनां प्रतिग्रहकारणत्वादिति” “आनतेरनियतोपायपरिणामादिति” च दाय०भा० । भावे क्तिन् । २नम्रीभावे, ३अधोभवने, ४नम्रतायाञ्च “आत्मजातिसदृशीं क्रियानतिम्” किरा० ।

**आनद्ध** न० आ+नह+क्त । चर्म्मणा बद्धमुखे १पटहमुरजादौ वाद्यभेदे, । २ग्रथिते, ३व्याप्ते, ४बद्धे केशभूषादिके च त्रि० । “मूत्रवहे द्वे तयोर्मूलं वस्तिर्मेढ्रञ्च तत्र विद्धानद्धवस्तिता” सुश्रु० ।

**आनन** न० अनित्यनेन आ+अन—करणे ल्युट् । मुखे मुखेन हि जलपानादिना प्राणादेः स्थितिरतस्तस्य तथात्वम् “शारसैः कलनिर्ह्रादैः क्वचिदुन्नमिताननौ” “तदाननं मृत्सुरभि क्षितीश्वरः” नृपस्य कान्तं पिबतः सुताननम्” इति च रघुः ।

**आनन्तर्य्य** न० अनन्तरमेव चतुर्व० स्वार्थे ष्यञ् । १अव्यवहिते अनन्तरस्य भावः ष्यञ् । २अव्यवधाने । “आनन्तर्य्यात् स्वयोन्यास्तु तथा बाह्येष्वपि क्रमात्” मनुः “पयसः कालानन्तर्य्येधर्म्मानुग्रहेभ्यः” कात्या० ४,२,१६ ।

**आनन्त्य** न० अनन्तएव स्वार्थे ष्यञ् । १अनन्ते २असीमे अनन्तस्य भावः ष्यञ् । ३सीमाशून्यत्वे ४नाशराहित्ये “हविर्यच्चिररात्राय यच्चानन्त्याय कल्पते” मनुः । “लोकानन्त्यं दिवः प्राप्तिः पुत्रपौत्रप्रपौत्रकैः” या०स्मृतिः । “आनन्त्यात् कुलधर्म्माणां द्वादशाहे विधीयते” आ०त०पु०५ शाश्वतप्रतिष्ठायाञ्च “यस्तु नित्यं कृतमतिर्धर्म्ममेवाभिपद्यते । अशङ्कमानः